अङ्क-२४
जुलाई-दिसम्बर २०१४

वेदविद्या
ISSN-2230-8962

# वेदशास्त्रं विना लोके मनुष्यत्वं न कल्पेत

डॉ. कृष्णमोहनपाण्डेयः

अखिलमिदं विश्वं कस्याश्चिदपि संस्कृतेर्मूलमुद्गमं चावबोधयितुं संस्कृतमयं वेदं तत्साहित्यं चावलम्बते । तदा निश्चयेनानेन स्वीयेन सत्यसनातनशाश्वतेनाक्षुण्णनिधिना परमभाग्यमनुभवामो वयम्। संस्कृतिसंस्कारसभ्यतासदाचारसद्विचारसम्पोषकमिदं भारतस्य गौरवं संस्कृतम् । अस्यां भाषायामेव सर्वशक्तिमद्भिः श्रीमद्भगवद्भिः क्षणभङ्गुरेऽस्मिन् प्रापञ्चिकलोके परिदृश्यमानायां चराचरसृष्टौ निखिलमानवानामाधिदैविकाधिभौतिकाध्यात्मिकतापत्राणाय लौकिकपारलौकिकनित्यनितान्ताखिल-कल्याणाय सदसद्विवेकशालिनीमखिलमनुष्यजातिमधिकृत्य लोकलोकान्तराद्याः जगद्व्यवहारकर्त-व्याकर्तव्यावबोधादिविषयप्रवृत्ताः सततसर्वहितशासकात्मकाः विधिनिषेधाध्यात्मविचारादिविषयकाः परम्पारमिकदिव्यालौकिकसाधनभूताः सर्वज्ञानविज्ञानमयाः साक्षात्परमेश्वररूपाः वेदा एवास्माकं धरायां प्रतिष्ठिताः । **'सर्वं विदुर्वेदविदो वेदे सर्वं प्रतिष्ठितम् । वेदे हि निष्ठा सर्वस्य यद्यदस्ति च नास्ति च'॥** एवमेवान्यत्राप्युक्तम् **'वेदः शिवः शिवो वेदः वेदाध्यायी सदाशिवः'** । सर्वोपकारकाणामखिलब्रह्माण्ड-ज्ञानप्रकाशकानां वेदानामाविर्भावो विश्वकल्याणाय सम्बभूव । संस्कृतमध्यात्मविद्या । एषा प्रापञ्चिकलोकं पारयित्वा नाकं प्रापयति । सा विद्या या विमुक्तये । ऋषिः निर्दिशति यद्धृदयं निष्कलुषं स्यात्, मधुरं वचनं स्यात्, मधुरं श्रवणं स्यात् -

**मधुमन्मे निक्रमणं मधुमन्मे परायणम् । वाचा वदामि मधुमत् भूयासं मधुसन्दृशः ॥**[1]

शान्तिर्भवतु सर्वत्रेति मन्त्रयन् साक्षात्कृतधर्माणः मन्त्रद्रष्टारः प्रचेतारः ऋषयः जग्मुः -

**ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः**
**शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।**[2]

एवं विश्वशान्तिः विश्वबन्धुत्वमेव च वेदानां परमलक्ष्यम् **यत्र विश्वं भवत्येकनीडम्** । मनुष्याः विश्वपरिधेः केन्द्रत्वाच्छ्रेष्ठाः। सम्पूर्णजगतः कर्त्ता ब्रह्म इत्यस्य ज्ञानं मनुष्य एव प्राप्नोति । वेदानां सङ्कलनकर्त्रा महर्षिणा वेदव्यासेन निगदितं यत् -

**गुह्यं ब्रह्म तदिदं ब्रवीमि । नहि मानुषात् श्रेष्ठतरं हि किञ्चित् ॥**

---

[1] अथर्ववेदः १.३४.३
[2] यजुर्वेदः ३६.१७

मनुष्याः सर्वप्रमुखाः संस्कारधर्माचरणत्वात् । उक्तमपि - '**धर्मेण हीनाः पशुभिः समानाः**" । धर्मविहीनः आचारः न भवति सदाचारः । संस्कृतेर्निमाणमाचारेण धर्मेण च भवति । **कर्मठगुरौ** दृष्टान्तो दृश्यते -

**आचारः परमो धर्मः सर्वेषामिति निश्चयः । हीनाचारी परीतात्मा प्रेत्य चेह विनश्यति ॥**

**नैनं तपांसि न ब्रह्म नाग्निहोत्रं न दक्षिणा । हीनाचारा श्रितं भ्रष्टं तारयन्ति कथञ्चन ॥**[३]

भारतीयासंस्कृतिः धर्माश्रिता, धर्मानुकूलमाचरणमेव मनुष्यत्वमिति संस्कृतं ज्ञापयति । एषा संस्कृतिः विश्वस्य सर्वप्राचीना महनीया सर्वानुगम्या संरक्षणीया सनातनी शाश्वती च परम्परा । गर्भाधानादन्त्येष्टिपर्यन्तं षोडशसंस्काराः संस्कृतेर्महती विशेषता । समानं गमनं समानं वचनं समानं मनस्स्यादिति भारतीयपरम्परायां चिन्तनम् । ऋग्वेदस्य मन्त्रोऽयं द्रष्टव्यः ;-

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् । देवा भागं यथा पूर्वे संजानाना उपासते ॥**[४]

कियत्सुन्दरं सार्वभौमिकं च चिन्तनमासीदृषीणां यत् समानं प्रयोजनं समानं हृदयं च भूयात् समेषाम्, समानो मन्त्रः, समानं मनः समानं चित्तमपि स्यादिति द्रष्टव्यौ मन्त्रौ -

**समानी व आकूतिः समाना हृदयानि वः ।**

**समानमस्तु वो मनो यथा वः सुसहासति ॥**[५]

**समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।**

**समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥**[६]

समाजः सरलः सुगमः सद्व्यवहारयुक्तः स्यात्, सहृदयं भूत्वा सर्वैः सह समानः व्यवहारः व्यवहर्त्तव्यः। समानत्वान्मनुष्यत्वं समायाति, समानत्वमेव सनातनत्वमेष धर्मः,वैदिकाः उद्घोषयन्ति-

**समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि ।**

**सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः ॥**[७]

द्वेषरहितमाचरणमेव कर्तव्यम् । एषो वैदिकधर्मः; एवमेव सर्वत्राद्वेषमेव कल्पयन्ति सर्वहितचिन्तकाः ऋषयः । अथर्ववेदस्य सांमनस्यसूक्ते ऋषिः बोधयति यत् हे मनुष्याः वयं भवद्भ्यः सौमनस्य वर्द्धनाय कर्म कुर्मः ;-

---

[३] कर्मठगुरुः

[४] ऋग्वेदः १०.१९१.०२

[५] ऋग्वेदः १०.१९१.०४

[६] ऋग्वेदः १०.१९१.०३

[७] अथर्ववेदः ३.३०.६

**सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।**
**अन्योअन्यमभि हर्यत वत्सं जातमिवाघ्न्या॥**[८]

मित्रादभयं स्यादमित्रादप्यभयं कश्चिदपि शत्रुर्न स्यात्, दिवसे रात्रौ वा कल्याणं स्यात्, सर्वत्राभयं स्यादिति मन्त्रयन् ऋषिः कथयति -

**अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः ।**
**अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु ॥**[९]

मातृ देवो भव, पितृ देवो भव, भ्राता भ्रातरैः सह न द्रुह्यात् । सर्वैः सह सर्वे भद्रं वाचं वदन्तु, पुत्रः पितृभक्तो भवेत्, पत्न्या सह मधुरं निगदेत् ऋग्वेदस्य मन्त्रोऽयं द्रष्टव्यः ;-

**मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा । सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ।**[१०]
**अनुव्रतः पितुः पुत्रो मात्रा भवतु सम्मनाः । जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम् ॥**[११]

पृथिव्यां सर्वे प्राणिनः सर्वान् मित्रचक्षुषा पश्येयुः । मित्रत्वमेव धर्मत्वं, सान्दर्भिकमन्त्रोऽयं दृश्यते -

**दृते दृंह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।**
**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ॥**[१२]

साक्षात्कृतधर्माणः ऋषयः साक्षान्निर्देशनं कुर्वन्ति मानवेभ्यः सर्वेभ्यः, मनसि ये विचाराः सन्ति ते एव वचोभिः निस्सरन्ति वाण्या यत् वदति कर्मणि तदाचरति ।

**यन्मनसा मनुते तद्वाचा वदति । यद्वाचा वदति तत्कर्मणा करोति ।**[१३]

अस्यां चिरकालिक्यां सनातन्यां शाश्वत्यां परम्परायां गृहस्थधर्मः सर्वधर्मोपकारकः । कविकुलकमलदिवाकरः महाकविकालिदासः ज्ञापयति सन्दर्भेऽस्मिन् रघुवंशे रघुकौत्सप्रसङ्गेन -

**अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ।**
**कालो ह्ययं सङ्क्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥**[१४]

---

[८] अथर्ववेदः ३.३०.०१
[९] अथर्ववेदः १९.१५.६
[१०] अथर्ववेदः ३.३०.३
[११] अथर्ववेदः ३.३०.०२
[१२] यजुर्वेदः ३६.१८
[१३] अथर्ववेदः
[१४] रघुवंशमहाकाव्यम् ५.१०

मानवधर्मरक्षणाय संवर्धनाय च पञ्चयज्ञाः गृहस्थस्यानिवार्याः कार्याः । तेषु अतिथियज्ञः कथमिति प्रस्तुवन्कथयति रघुवंशमहाकाव्ये महाकविकालिदासः । कौत्सः रघुसमीपं समायाति दक्षिणार्थम् । अतिथि देवो भवेति विचिन्त्य रघुः तमतिथिं मत्वाभिनन्दति; द्रष्टव्योऽयं प्रसङ्गः -

**स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः ।**
**श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥**[१५]
**तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी ।**
**विशाम्पतिर्विष्टरभाजमारात्कृताञ्जलिः कृत्यविदित्युवाच ॥**[१६]
**अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ।**
**यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥**[१७]

दातायाचकयोः कीदृशस्सम्बन्धो भवेदिति निर्दिशन् महाकविः रघुकौत्सप्रसङ्गमाध्यमेन सुबोधपद्धत्या ज्ञापयति यत् कौत्सः गुरुप्रदेयार्थं चर्तुदशकोटिस्वर्णमुद्रां रघुं ययाच। युद्धपराजय-भयात् कुबेरादधिकं धनं प्राप्य रघुः सर्वं धनं दातुमुत्सकः किन्तु कौत्सेन गुरुप्रदेयमधिकमस्वीकृतं सर्वजनसमक्षं गम्यमानमिदं घटनाचक्रमभिनन्दनीयमिति जनाः सहैव कथयामासुः ;-

**स भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् ।**
**दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम् ॥**[१८]
**जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।**
**गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥**[१९]

एतादृशी भारतीया संस्कृतिः । सनातनीभाषायां समेषां हितचिन्तकाः आत्मज्ञानप्रपन्नाः ऋषयः सृष्ट्यारम्भे तपदीक्षादिनियमानां पालनं कृतवन्तः तत एव राष्ट्रभावं बलमोजश्चोत्पन्नः ।

**भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो दीक्षामुपनिषेदुरग्रे ।**
**ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसंनमन्तु ॥**[२०]

[१५] रघुवंशमहाकाव्यम् ०५.०२
[१६] रघुवंशमहाकाव्यम् ०५.०३
[१७] रघुवंशमहाकाव्यम् ०५.०४
[१८] रघुवंशमहाकाव्यम् ०५.३०
[१९] रघुवंशमहाकाव्यम् ०५.३१
[२०] अथर्ववेदः १९.४१.०१

भारतीयायां संस्कृतौ ऋषयः **'सर्वे भवन्तु सुखिनः'** इति कल्पयन्ति, सर्वत्र प्रियमिच्छन्ति, को राजा ? कः सामान्यः ? कश्श्रेष्ठः ? कः शूद्रः ? कैश्चित्सार्द्धमप्यप्रियं नेच्छन्ति सर्वत्र समानं व्यवहरन्ति -

**प्रियं मा॑ कृणु दे॒वेषु॑ प्रि॒यं राज॑सु मा कृणु । प्रि॒यं सर्व॑स्य पश्य॑त उ॒त शू॒द्र उ॒तार्ये॑ ॥**[२१]

**अ॒हं गृ॑भ्णामि॒ मन॑सा॒ मनां॑सि॒ मम॑ चि॒त्तमनु॑ चि॒त्तेभि॒रेत॑ ।**

**मम॒ वशे॑षु हृद॑यानि वः कृणोमि॒ मम॑ या॒तमनु॑वर्त्मान॒ एत॑ ॥**[२२]

केन सह कीदृशो व्यवहारो व्यवहर्त्तव्य ? इति ज्ञापयन् भर्तृहरिः भणति-स्वजने दाक्षिण्यं दर्शनीयं, परिजने दया विधेया, शठे शाठ्यं समाचरेत्, साधुजने प्रीतिं प्रसारयेत्, विदुषां मध्ये सारल्यं समाचरेत्, सम्पूर्णा जीवनशैली सरला सुभगा कलाकुशला च भवेत् -

**दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने**
**प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम् ।**
**शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धृष्टता**
**ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोके स्थितिः ॥**[२३]

लोके व्यवहारे शास्त्रविधयः के ? कथं मानवकल्याणं ? किं कर्त्तव्यं ? परधनहरणे संयमः, भाषणे सत्यं, परहितचिन्तनं सर्वमानवहितानुकम्पनं, कथमुत्तममार्गानुसरणमिति बोधयन् वदति पुनः ;-

**प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं**
**काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।**
**तृष्णास्त्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा**
**सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥**[२४]

लोकाचारः सदाचारः कथं भवेत् ? परोपकारः संस्कारे कथमागच्छेत् ? अन्येषां दानेन सहयोगः कथम् ? अतिथीनां सम्मानं, प्रियं कृत्वा मौनं, निन्दाराहित्यं, धनं प्राप्यानौद्धत्यं कथं भवेदिति भाषते -

**प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृते ।**

---

[२१] अथर्ववेदः १९.६२.०१
[२२] अथर्ववेदः ०६.९४.०२
[२३] नीतिशतकम् २२
[२४] नीतिशतकम् २८

**अनुत्सेको लक्ष्म्यामनभिभवगन्धाः परकथाः सतां केनोद्दिष्टं विषममसिधारव्रतमिदम् ॥** [२५]

ईश्वरस्य सुन्दर्यां शरीररचनायां बहूनि अङ्गानि सन्ति, तेषामङ्गानां पृथक्वैशिष्ट्यं हस्तयोश्शोभा दानं, शिरश्शोभा गुरुजनपदनमनं, शरीरस्य सर्वप्रमुखे मुखे सत्यं प्रियं सुखकरं भाषणं हृदये स्वच्छा वृत्तिः, कर्णयोश्शास्त्रश्रवणमेव सज्जनानामाभूषणमनेनैव सद्व्यवहारेण मानवकल्याणं कल्पितमस्माकं संस्कृतौ सहृदयत्वमेव मानवत्वं दर्शनीयोऽयं श्लोकः ;-

**करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता**
**मुखे सत्या वाणी विजयि भुजयोर्वीर्यमतुलम् ।**
**हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयोः**
**विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्॥** [२६]

शाश्वत्यां सनातनीपरम्परायां सज्जनत्वामेवस्माकं वैशिष्ट्यं, सज्जनाः सर्वत्र शंसिताः, सज्जनसंसर्ग एवाभिनन्दनीयः, अन्येषां गुणेषु प्रीतिः, श्रेष्ठजनैः सह विनम्रता, व्यसने विद्यैव, स्वयोषितायामेव रतिः, एवमेव सज्जनत्वं कथमिति निर्दिशन्निगद्यते-

**वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता**
**विद्यायां व्यसनं स्वयोषितरतिर्लोकापवादात्भयम् ।**
**भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले**
**येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥** [२७]

एवं भारतं भारतीयं च नमामो वयमेनं विना नास्ति किञ्चिदप्यस्तित्वमस्माकम् । उक्तमपि- '**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा**'। जयतु भारतम् । जयतु संस्कृतम् ॥

**डॉ. कृष्णमोहनपाण्डेयः**
असिस्टेण्ट प्रोफेसर (वेद),
सनातनधर्म-आदर्श-संस्कृत-महाविद्यालयः,
डोहगी, ऊना, (हिमाचल प्रदेश)

[२५] नीतिशतकम् ६४
[२६] नीतिशतकम् ६५
[२७] नीतिशतकम् ५९